बलीवर्द प्रयोग करने के लिए पीली मिट्टी का बना हुआ बैल लेकर बलीवर्द के सम्पूर्ण शरीर को हरिद्रा व पीत चन्दन के द्वारा (केसर युक्त) लेपन करना चाहिए। तथा बलीवर्द की नाभि के स्थान में गोल छिद्र करके उदर मे भोजपत्र पर हरिद्रा एवं गोरोचन के रस से व अनार की लेखनी से बगलामुखी यन्त्र निर्माण कर यन्त्र के मध्य में बगलामुखी मूल मन्त्र का लेखन कर शत्रु का नाम व गोत्र भी यन्त्र व मन्त्र के मध्य स्थापित करें तदुपरान्त भोजपत्र पर निर्मित बगलामुखी यन्त्र में दिशाओं का अंकन करे तथा शत्रु पक्षका जिस दिशा में आवास, कार्यालय, अथवा बन्दी जिस स्थान पर हो उस दिशा को बगलामुखी यन्त्र के मध्य भाग को उस दिशा से जोड़े। उसके बाद भोजपत्र पर लिखित यन्त्र को चार परतों में मोड़कर बलीवर्द के उदर रूपी छिद्र में स्थापित करें व आर्द्र पीली मिट्टी से उस छिद्र को पूर्णरुप से बन्द करें।

इस प्रयोग को रविवार के दिन अथवा गुरुवार के दिन रोहिणी या पुष्य नक्षत्र में विशेष रूप से साधक को करना चाहिए। उक्त वार नक्षत्र को ही बलीवर्द को पीत वस्त्र से आच्छादित करे व षोडशोपचार पूजन व पीत सामग्रियों द्वारा करना चाहिए।

विजय प्राप्ति व बन्धन से मुक्त होने के लिए बलीवर्द प्रयोग ग्यारह दिन तक निरन्तर रात्रि काल में पीताम्बरा कवच का पाठ व मन्त्र का जाप घी का दीपक जलाकर व सरसों के तेल का दीपक जलाकर बगलामुखी दीक्षित आचार्य के द्वारा सम्पादित कराया जाना चाहिए।

बिल्व फल का प्रयोगः

दश महाविद्याओं में बगलामुखी का महत्व सर्वोपरि माना गया है। तथा बगलामुखी देवी को कतिपय लोग तान्त्रिक देवी के रुप में मानते है। परन्तु विशेषतः शत्रु मर्दन के लिए बगलामुखी देवी को तामसी माना गया है।

परन्तु बगलामुखी देवी को अपर विद्या श्री देवी के नाम से भी ख्याति प्राप्त है जो कि वर्तमान युग में उत्पन्न गृहस्थियों की समस्याओं में जैसे कि वास्तुदोष, मकान में वायुप्रकोप, स्थिर लक्ष्मी प्राप्ति के लिए व्यापार वृद्धि के लिए श्री वृद्धयर्थ कीलित व्यापार (फेक्ट्री आदि) अथवा कीलित मकान को कीलन से मुक्त करने के लिए विल्व फल अनुष्ठान का विधान सोमवार अथवा शुक्रवार श्रवण अथवा पुष्य नक्षत्र में पके हुए विल्व फल लेकर 108 विल्व फलों की संख्या हो तथा प्रत्येक विल्व फल के मध्य भाग में गोल छिद्र करे वह छिद्र मध्य तक होना चाहिए और उसमें वास्तु दोष हेतु सामग्री :-

घी, जायफल, लवंग, लोहवान, पीत पुष्प, नौसादर आदि को एकत्रित कर विल्व फलों के छिद्र को सामग्री से पूर्ण करें। तथा खेजड़े की समिधा व बगलामुखी मूल मन्त्र के साथ घृत युक्त आहुति से स्वाहाकार करें। इसी प्रकार मकान में वायुप्रकोप शान्ति हेतु अथवा रोगोपशमन हेतु सामग्री–गुग्गल, लोहवान, कालीमिर्च, बूरा, नौसादर, जायफल, पीत चन्दन का बुरादा व सरसों का तेल हवन सामग्री में मिलावें तथा उक्त सामग्री को बतायी विधि के अनुसार विल्व फलों के छिद्र में भरकर बगलामुखी के मूल मन्त्र से 108 बार स्वाहाकार करें।

स्थिर लक्ष्मी प्राप्ति के लिए :

विल्व फल का बुरादा, भोजपत्र, जायफल, लोहवान, बूरा, तथा पीत अम्बर बेल आदि को घृत में मिलाकर श्री यन्त्र को वेदी के मध्य भाग में स्थापित करें व मूल मन्त्र के साथ सम्पुटित श्रीसूक्त का हवन करें व हवन शान्ति के बाद श्री यन्त्र को पूजा में स्थापित करें यह प्रयोग विशेषतः श्रवण पुष्य व स्वाति नक्षत्रों में ही करना चाहिए।

श्री वृद्धि के लिए भी उपर्युक्त हवन विधि के साथ पीताम्बरा श्री सूक्त का सम्पुटित अनुष्ठान दीपावली के दिन अथवा चन्द्र ग्रहण के दिन 101 पाठों का अनुष्ठान कर हवन करना चाहिए। इसके करने से श्री वृद्धि होती है।

व्यापार वृद्धि हेतु इस हवन प्रक्रिया में ही विशेष रूप से बगलामुखी यन्त्र में स्थापित श्री यन्त्र को पांच यन्त्रों की संख्या में लेकर हवन वेदिका में स्थापित करे व शुद्धि व सिद्धि होने के उपरान्त मकान व्यापार (फेक्ट्री) आदि चारों कोनों में स्थापित करें तथा पष्ठचम श्री यन्त्र को पूजा स्थल में स्थापित करें। फेक्ट्री अथवा कीलित मकान को कीलिन से मुक्ति हेतु व्यापार अथवा वास्तु (मकान) कीलन मुक्ति के लिए भगवती बगलामखी देवी के कवच के 108 पाठ करके उपर्युक्त विधि के अनुसार हवन व कीलन मुक्ति हेतु विशिष्ट संकल्प का उच्चारण कर हवन करे। तथा कीलन मुक्ति हेतु अनुष्ठान व हवन बगलामुखी दीक्षित आचार्य के द्वारा ही करना चाहिए क्यो कि कीलन मुक्ति हेतु विशेष प्रयोगो का उल्लेख यहाँ नही किया जा रहा है। वह गोपनीय है।

कुष्माण्ड प्रयोग :

आज का युग द्वेष प्रधान युग है जो कि मनुष्य अन्य व्यक्ति के सुख को देखकर के व्यथित होता है और वह पड़ौसी, रिश्तेदार, भाई बन्धु इतना ही नही अपने परिवार की वृद्धि को देखकरके भी वह ईर्ष्यालु हो जाता है। पर सुख से असहनीय होने से वह स्वयं व्यथित होकर के अन्य को भी दुःखी करना चाहता है।

इसके लिए वह कूष्माण्ड मूठ आदि का प्रयोग करवाता है। इसके बचाव के लिए कूष्माण्ड के प्रयोग को कूष्माण्ड द्वारा ही शान्त किया जाता है। तथा कूष्माण्ड के अभाव में नीबू का प्रयोग करके भी रोगोपशमन, वायु प्रकोप, मारण प्रयोग, जिह्वा कीलन आदि से मुक्त किया जाता है। अतिशय गोपनीय होने के कारण अर्थात् यन्त्र मन्त्र व तन्त्र के प्रभाव हीन हो जाने के भय से साधक ने विशेष रूप से उल्लेख नही किया है।

पञ्चमोअध्याय:

वज्रपञ्जर कवच स्तोत्रम्

अथध्यानम् :

नमः पापविदूराय नमस्ते चन्द्रशेखर ।
बगलां चोपसंहारविद्यां वद सुपावनीम् ॥

शिव उवाच -

पञ्जरं तत्प्रवक्ष्यामि देव्याः पापप्रणाशनम् ।
यं प्रविश्य न बाधन्ते बाणैरपि नरा भुवि ॥1॥

ॐ ऐं हं श्रीं श्रीमत्पीताम्बरा देवी बगला बुद्धिवर्द्धिनी ।
पातु मामनिशं साक्षात् सहस्रार्कयुतद्युतिः ॥2॥

शिखादिपादपर्य्यन्तं वज्रपञ्जरधारिणी ।
श्रीब्रह्मास्त्रविद्या या पीताम्बरविभूषिता ॥3॥

बगला मामवत्वत्र मूर्द्धभागं महेश्वरी ।
कामाङ्कशा कला पातु बगला शास्त्रबोधिनी ॥4॥

पीताम्बरा सहस्राक्षी ललाटे कामितार्थदा ।
ॐ ऐं ह्रीं श्रीं श्रीः (मे) पातु पीताम्बरसुधारिणी ॥5॥

कर्णायोश्चैव युगपदतिरत्नप्रपूजिता ।
ॐ ऐं ह्रीं श्रीं पातु बगला नासिकां मे गुणाकरा ॥6॥

पीतपुष्पैः पीतवस्त्रैः पूजिता वेददायिनी ।
ॐ ऐं ह्रीं श्रीं पातु बगला ब्रह्मविष्ण्वादिसेविता ॥7॥

पीताम्बरा प्रसन्नास्या नेत्रयोर्युगपद्भ्रुवोः ।
ॐ ऐं ह्रीं श्रीं पातु बगला बलदा पीतवस्त्रधृक् ॥8 ॥

अधरोष्ठौ तथा दन्तान् जिह्वां च मुखगा मम ।
ॐ ऐं ह्रीं श्रीं पातु बगला पीताम्बरसुधारिण ॥9 ॥

गले हस्ता तथा बाहौ युगपद्बुद्धिदा सताम् ।
ॐ ऐं ह्रीं श्रीं पातु बगला पीतवस्त्रावृता घना ॥10 ॥

जङ्घायां च तथा चोरौ गुल्फयोश्चातिवेगिनी ।
अनुक्तमपि यत्स्थानं त्वक्केशनखलोम मे ॥11 ॥

श्रीशिव उवाच -

असृग्मांसं तथास्थीनि सन्धयश्चाति मे परा ।
इत्येतद्वरदं गोप्यं कलावपि विशेषतः ॥12 ॥

पञ्जरं बगलादेव्या दीर्घदारिद्र्यनाशनम् ।
पञ्जर यः पठेद्भक्त्या स विघ्नैर्नाभिभूयते ॥13 ॥

अव्याहतगतिश्चापि ब्रह्माविष्ण्वादिसत्पुरे ।
स्वर्गे मर्त्ये च पाताले नारयस्तं कदाचन ॥14 ॥

प्रबान्धते नरं व्याघ्राः पञ्जरस्थं कदाचन ।
अतोभक्तैः कौलिकैश्च स्वरक्षार्थं सदैव हि ॥15 ॥

पठनीयं प्रयत्नेन सर्वानर्थविनाशनम् ।
महादारिद्र्यशमनं सर्वमाङ्गल्यवर्द्धनम् ॥16 ॥

विद्याविनयसत्सौख्यं महासिद्धिकरं परम् ।
इदं ब्रह्मास्त्रविद्यायाः पञ्जरं साधु गोपितम् ॥17 ॥

पठेत् स्मरेद् ध्यानसंस्थः स जीयान्मरणं नरः।
यः पञ्जरं प्रविश्यैवं मन्त्रं जपति वै भुवि ॥18॥

कौलको व कौशिको वा व्यासवद् विचरेद् भुवि।
चन्द्रसूर्यप्रभूर्भूत्वा वसेत् कल्पायुतं दिवि ॥19॥

सूत उवाच -

इति कथितमशेषं श्रेयसामादिबीजं,
भवशतदुरितघ्नं ध्वस्तमोहान्धकारम् ।
स्मरणमतिशयेन प्रातरेवात्र मर्व्यो,
यदि विशति सदा यः पञ्जरं पण्डितः स्यात् ॥20॥

"इति श्रीबगला परमरहस्याति रहस्ये श्री पीताम्बरायाः पञ्जरं स्तोत्रम्"

विशेष :- इस पञ्चर स्तोत्र के पाठ करने के बाद पाठक को निम्नलिखित मन्त्र का जाप अवश्य करना चाहिए।

"ॐ क्ष्रीं नमो भगवते पक्षिराजायअभिचारध्वंसकाय हुँ फट् स्वाहा"

॥ अथ श्रीपीताम्बरारत्नावलीस्तोत्रम् ॥

॥ श्री गणेशाय नमः ॥ ॥ श्रीपीताम्बरायै नमः ॥

ओङ्कारद्वयसम्पुटान्तरपुटं मायास्थिराद्वन्द्वितं,
तन्मध्ये बगलामुखीति विमलं सम्बोधनं सर्व च ।
दुष्टानामथ वाचमाशु च-मुखं संस्तम्भयेत्यक्षरं,
जिह्वां कीलय कीलयेति च लिखेद् बुद्धिं तथा नाशय ॥1॥

ब्रह्मास्त्रं सकलार्थसिद्धिजनकं षट्त्रिशदवर्णात्मकं -
प्रोक्तं पद्मभुवा हिताय जगतां यन्नारदाग्रे पुरा ।
जीवन्मुक्तपदे विभान्ति सुधियो येषां मुखे भासते,
निर्द्वन्द्वामृतसागरेन्दुकिरणाहाराश्चकोरास्तु ते ॥2॥

ओमित्यादिस्वरूपं जपति तव शिवे शब्दतन्मात्रगर्भा-
वाचो यस्मात् परार्थप्रकटितपटवो वर्णरूपा निरीयुः ।
ब्रह्माद्यैः पञ्चतत्वैः परिवृतमनघं चित्प्रबोधाधिगम्यं,
दुर्ज्ञेयं योगयुक्तैः कथमपि मनसा योगिभिर्गृह्यमाणम् ॥3॥

ह्लीं बीजं 'हृदि यस्य' भाति विमलं लक्ष्मीः स्थिरा तद्गृहे,
धैर्यं तस्य कलेवरेऽपि विशते दीर्घायुषो भूतले ।
कल्पान्तेष्वपि वृद्धिमेति विमला तद्वंशवल्ली परा,
शौर्यं स्थैर्यमुपैति तस्य पुरतस्त्रस्यन्ति वादीश्वराः ॥4॥

बद्धुं वारिधिमुद्यतो जनकजानाथोऽपि पीताम्बरे !
त्वां ध्यात्वाऽर्णवशोषणे कृतमतिः सेतुं प्रचक्रेद्रुतम् ।
जित्वा रावणमुग्रशत्रुमबलान् वन्दीन् विमुच्याऽमरान्,
कीर्तिं लोकसुखोदयां व्यरचयत् कल्पस्थिरामम्बिके ॥5॥

गर्वी खर्वति रङ्कति क्षितिपतिर्मूकायते वाक्पति-
र्वह्नीः शीतति दुर्जनः सुजनते पुष्पायते वासुकिः।
श्रीनित्ये बगले तवाक्षरपदैर्यन्त्रीकृता यन्त्रिताः,
के के नो निपतन्ति स्रस्तमुकुटाश्चन्द्रार्कतुल्या अपि ॥6॥

लावण्यामृतपूरिते तव कृपापाङ्गे निमग्ना नरा,
ब्रह्मेशादिदिगीशवृन्दमपि ते जानन्ति गुञ्जोपमम्।
येषां चेतसि संस्थिताऽसि बगले! ते विश्वरक्षाक्षमाः,
प्रारब्धं द्रढयन्ति सत्वरतरं विघ्नैरविघ्नीकृताः ॥7॥

मुख्यत्वं समुपैति संसदि तवाऽपाङ्गावलोके नरः,
किं तच्चित्रमहो स्वयं प्रभवते सृष्टिस्थितिध्वंसने।
यश्चित्ते तव 'भाति मामक इति' त्वद्दर्शनं यस्य वा,
तं सर्वा ह्यणिमादयोऽप्यतितरामाराधयन्ते ध्रुवम् ॥8॥

क्षीणानां बलदायिनीं जलनिधौ 'पोतस्थितौ नाविकां',
तत्त्राणं घनकुञ्जगह्वरगिरिव्याघ्रादिभीतेष्वपि।
त्वां पीताम्बरधारिणीं 'परशिवां चन्द्रार्द्धचूडां गदा-
हस्तां वामकरे प्रतीपरसनामुन्मीलयन्तीं भजे ॥9॥

स्वेच्छं ये प्रणमन्ति पादयुगलं पीताम्बरे! तावकं,
ते वाञ्छाधिकमर्थमाप्य सकलां सिद्धिं भजन्ते पुनः।
यद्यत्कर्त्तुमुरीकरोति बगले! त्वत्साधकोऽत्राधुना,
तत्सञ्जातमिवेक्षते तव कृपाऽपाङ्गावलोके क्षणात् ॥10॥

वाणी सूक्तिसुधारसद्रवमयी सालङ्कृतिस्तन्मुखे,
शापानुग्रहकारिणी कविजनानन्दैकसंवर्द्धिनी।
व्याकर्तुं क्षमते विशालमतिमांस्त्वत्सेवको वाङ्मयं,
किं चित्रं यदि सृष्टिमाशु रचते ब्रह्माण्डकोट्यायते ॥11॥

देवि ! त्वद्भक्तदृष्ट्या तुहिनगिरिमुखाः पर्वताः पांसुतुल्या
ज्वालामालाश्च चन्द्रामृतकरसदृशाः पुष्पतां यान्ति नागाः ।
मूकत्वं वाक्पतीन्द्राः सरसि समतुलामाश्रयन्ते समुद्रा
राजानो रङ्कभावं रणभूवि रिपवो विद्रवन्ते विशस्त्राः ॥12॥

लेख्यं तावकमन्त्रवीजममलं दुष्टौघसंस्तम्भन,
वश्याकर्षणमारणप्रमथनप्रक्षोभणोच्चाटने ।
व्यक्तं वज्रमिवापरं यदि मुखे जागर्त्ति तस्याग्रतः,
पादान्तः परिसञ्चरन्ति रिपवो ये सप्तद्वीपेश्वराः ॥13॥

नानारत्नविभूषितामलमणिद्वीपे सुधासागरे,
कल्पानोकहकाननान्तरगता या रत्नवेदी परा ।
तत्राकारित पञ्चप्रेतकमये सिंहासने संस्थितां,
ध्यायेऽहं करुणाकरां हरिहराराध्यामशेषार्थदाम् ॥14॥

वाग्देवी वदने वसत्यविरतं नेत्रे च लक्ष्मीः करे,
दानं दीनकृपालुता च हृदये वीरत्वमाजौ सदा ।
त्वद्भक्तस्य भवाब्धिपारतरणे तत्त्वोदयो जायते,
तेनेदं नलिनीदलोपरि जलाकारं जगद् भासते ॥15॥

चञ्चत्काञ्चनतुल्यपीतवसनां चन्द्रावतंसोज्ज्वलां,
केयूराङ्गदहारकुण्डलधरां भक्तोदयायोद्यताम् ।
त्वां ध्यायामि चतुर्भुजां त्रिनयनामुग्रारिजिह्वां करे,
कर्षन्तीमहमम्ब पाहि बगले ! त्राणं त्वमेवासि मे ॥16॥

मातस्ते महिमानमुग्रमधिकं प्रोक्तं स्वयं मानवै-
र्वाक्यं सन्द्रियते श्रमेण यदि वा शक्त्यां गुणाम्भोनिधेः ।
नो निश्शेषतया सुरैरविदितप्रान्तस्य पद्मालये,
तस्मात् सर्वगता त्वमेव सदसद्रुपा सदा गीयते ॥17॥

खञ्जं ताक्ष्र्यसमोद्यमं प्रकुरुते तार्क्ष्यं च खञ्जाधिकं,
वान्त स्तम्भयते जलाग्निशमने याऽव्यक्तशक्तिः शिवे।
तद्बीजं बगलेति मेऽस्तु रसनालग्नं सदैवामलं,
यद्ब्रह्मादिसुदुर्लभ भुवि नरैः सत् प्राक्तनैर्लभ्यते ॥18॥

स्तम्भत्वं पवनोऽपि याति भवती भक्तस्य पीताम्बरे,
किं चित्रं यदि वारिधिः स्थलपदं मेरुस्तु माषोपमाम्।
कल्पानोकहकामधेनुप्रमुखै रत्नैरलिन्दस्थितै-
वञ्छार्थाधिकदानमाशु कुरुते दीनेष्वदीनेष्वपि ॥19॥

भाग्याद्यस्य मुखे विभाति विमला विद्या विशेषाधिका,
षट्त्रिंशद्भिरथोदिता बहुगुणैर्बीजैस्तु सर्वार्थदा।
तं सर्वे प्रणमन्ति मानवममी सेन्द्राः सुरा भूसुराः,
क्रन्ताशेषमहोदयं स्वकलनाक्रान्तत्रिलोकालयम् ॥20॥

यत्किञ्चिद्भुवने विभाति विमलं रत्नं महानन्दनं,
यां यां वृत्तिरुदारतां जनयते यद्यत्परं सुन्दरम्।
यत्किञ्चिद्भुवनेऽथवा नु महता शब्देन वा कीर्त्त्यते,
तत्सर्वं तव रूपमेव बगले! संसारपारप्रदे ॥21॥

जाग्रत्पूर्णकृपामृतौघभरिते श्रीमत्कटाक्षेक्षणे,
सर्वार्थप्रतिपादकव्रतधरे ये ये निमग्ना नराः।
तेषां भाग्यमतीन्दिय निगदितुं ब्रह्मादयो न क्षमा
ये संङ्कल्पविकल्पमात्ररचनाः प्राणात्यये हेतवः ॥22॥

हस्ते संगृह्य चापं शरधरनिकरैर्यत्किरातं महाजौ,
पार्थो ब्रह्मास्त्रविद्याभ्यसनपटुमतिर्द्वन्द्वयुद्धे तुतोष।
तत्सर्वं दववृन्देरथा रिपुनिवहवाक्षित सिद्धलोक-
धैर्यं शौर्यं च सर्वं तव वरजनितं भाति पीताम्बरेऽत्र ॥23॥

पीतां पीतजटाधरां त्रिनयनां पीतांशुकोल्लासिनीं,
हेमाभाङ्गरुचिं शशाङ्कमुकुटां सच्चम्पकस्रग्युताम्।
हस्तैर्मुद्गरवज्रवैरिरसनां संबिभ्रतीमादरात्,
दीप्ताङ्गी बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तये ॥24॥

कर्णालम्बितलोलकुण्डलयुगां श्वेतेन्दुमौलि करैः,
केयूराङ्गदपाशमुद्गरगदावज्रादिकान् बिभ्रतीम्।
देवीं पीतविभूषणामरिकुलध्वंसोद्यतां ये नरा ध्यायन्त्याशु
लभन्ति सिद्धिमतुलां ते बालिशाःस्युःकथम् ॥25॥

लब्धवा मातरशेषकान्तिभरितानन्दं कृपावीक्षणं,
वर्षीयानपि मोहितुं प्रभवति स्त्रीवृन्दमून्मीलितुम्।
किं तच्चित्रमनेकधा भ्रमयते द्दष्ट्या त्रिलोकीमिमां,
सूर्येन्दुस्तनधारिणीमपि बलात् कन्दर्पदर्पाधिकः ॥26॥

यन्त्रं जैत्रमनेकदुःखशमनं पीताम्बरे! तावक-
मोङ्कारद्वयसम्पुटेन पुटितं शिष्टैस्तथावेष्टितम्।
तद्वाह्ये स्थिरमायायाष्टपुटितं पाशङ्कुशाद्यावृतं,
येषां चेतसि 'भाग्यतो निवसते ते विश्वसर्गक्षमाः' ॥27॥

कर्पूरागुरुचन्दनैर्मृगमदैर्गोरोचनाकेशरैस्त्वत्पादाम्बुजमर्च -
यन्ति बगले! ये प्रत्यहं मानवाः।
ते लब्ध्वा श्रियमद्भुतामपि चिरं भोगांश्च भुक्त्वाऽवनौ,
सायुज्यालयमाविशन्ति परमानन्दोऽस्ति यत्राधिकः ॥28॥

लब्ध्वा पादयुगे रतिं तव शिवे क्षुद्रोऽपि देवन्द्रता-
मासाद्यामरसुन्दरीभिरमलैर्भोगैर्दिवि क्रीडति।
ये हित्वा तव भक्तिमन्यभजनानन्दाश्चिरं ते नरा
भ्रष्टा धर्मपराङ्मुखाभ्रमधियो भारं वहन्ते भुवि ॥29॥

यामाराध्य हरो हरत्वमभजद् विष्णुस्तु विश्वात्मतां,
चक्रे सृष्टिमजोऽप्यवोचदखिलं वेदादिसद्वाङ्मयम्।
ध्यात्वा ध्वान्तमशेषमाशु हरते सूर्योऽपि पीताम्बरे।
तीव्रं तापमपाकरोति रजनीनाथोऽपि चूडाश्रितः ॥30॥

इत्थं ये बगलामुखी पदगतिं लब्ध्वा पठिष्यन्ति ते,
यन्त्रारूढमिबारिवृन्दमखिलं कर्त्तुं समर्थाः सदा ॥31॥

ध्यात्वा त्वां बगले ! पुरा गिरिसुता चक्रे शिवं स्वं वरं,
प्रोक्तं नार्पयितुं शिवेन गदिता संकल्पनागनौ तदा।
त्यक्ताग्निर्गलितावलिं गिरिसुतात् त्यक्त्वा गलस्तन्मुखात्,
तस्मात् त्वं बगलामुखी निगदिता नित्या परा योगिनी ॥32॥

नागेन्द्रैर्देवसिद्धैर्मुनवरनिवर्हैर्दानवै राक्षसेन्द्रै-
दिक्पालैदिवकरीन्द्रैर्दिनकर प्रमुखैः सद्ग्रहैस्मारकाद्यैः।
ब्रह्माद्यैः स्थूलसूक्ष्मैरविदितमुदिता त्वं परा चोत्मनी त्वं,
नित्या पीताम्बरा त्वं रिपुभयशमनी भक्तिचित्तासनस्था ॥33॥

शम्भुर्यद्गुणगाननोद्यतमतिर्नाट्योत्सवैस्ताण्डवे,
चक्रे चन्द्रमयूखकम्पनकरां नीराजनां पादयोः।
हेमाम्भोजदलैर्जटाजलभरैरानन्दितैर्मौलिभिः,
पूजां प्रत्यहमातनोति नटयन् स्वैर्हस्ततालादिभिः ॥34॥

यां दध्रे चतुराननोऽपि वदने चित्तारविन्दस्थितां,
यां वक्षःस्थलसंस्थितां हरिरजामालिङ्ग्य पीताम्बराम्।
यद्देहार्धमुरीचकार पुरजित् सौन्दर्यसाराधिकां,
षट्चक्राक्षररूपिणीं भज सखे ! देवीं जगत्पालिकाम ॥35॥

हस्ते भाति गदा सदार्त्तिशमनी रत्नावली त्वद्भुजे,
पादे नूपुरमीशमौलिमणिभिर्नीराजितं राजते।

ताटङ्कं श्रवणे कुचोपरि सदा कस्तूरिकालेपनं,
काश्मीरद्रवमङ्गरागमधिकां पीतच्छवि तन्वते ॥36॥

ॐकारद्वयसम्पुटेन पुटितां 'विद्यागमे संस्थितां',
षट्चक्राक्षरबीजसाररचितां षट्त्रिशदर्णात्मिकाम्।
ये जानन्ति जपन्ति सन्ततमभिध्यायन्ति गायन्ति वा,
ते वन्द्या विबुधैश्चरन्ति भुवने सिद्धार्चिताः सिद्धये ॥37॥

स्वाहाशक्तिरुपासने तव ऋषिः श्रीनारदो देवता,
नित्या श्रीबगलामुखी निगदिता छन्दो भवेत् त्रिष्टुभम्।
बीजं तु स्थिरमायया विरचित नानाविधस्तम्भने,
प्रोक्तं पद्मभुवाऽखिलाप्तिविनियोगोऽप्यच्युताकारता ॥38॥

हृद्य सर्वसुरेश्वरैश्च ऋषिभिर्दुष्प्राप्यमेवाद्भुतं,
स्तोत्रं गोप्यतमं स्वभाग्यवशतः प्राप्तं पठिष्यन्ति ये।
सूक्त्या देवगुरुं 'धनेन धनदं' जित्वा चिरञ्जीवितां,
षण्मासात् सुखसागरे शिवसमाक्रीडां करिष्यन्ति ते ॥39॥

देवी स्वप्नगता स्वयैव लिखितं मुह्यं ददावद्भुतं,
दिव्यास्त्रं पुरतः पठस्व विमलं सिन्दूरवर्णैः करैः।
रोमाञ्चाङ्कितहर्षमाप्य लुलितैरङ्गैः पठन्तं नर-
प्राप्तोऽहं परमादयप्रदमिदं ज्ञानं कवीन्द्रादिदम् ॥40॥

प्राप्ता श्रीबगलामुखीवदनतः स्वप्ने सुविद्या मया,
षट्त्रिंशद्भिरिमैः सुवर्णनिचयैः सद्बीजरत्नावली।
येषां कण्ठगता विभाति जगतीपीठे प्रयोगक्षमा,
वश्याकर्षणमाहमारणविधौ स्तम्भे तथोच्चाटने ॥41॥

चलत्कनकमुण्डलोल्लसितचारुगण्डस्थलाम्,
लसत्कनकचम्पकद्युतिविराजिचन्द्राननाम्।

गदाहतविपक्षकां कलितलोलजिह्वाञ्चलां,
स्मरामि बगलामुखीं विमुखवाङ्मुखस्तम्भिनीम् ॥42॥

।। श्रीपीताम्बरारत्नावलीस्तोत्रम् सम्पूर्णम् ।।

॥अथ बगलामुखीत्रैलोक्यविजयं नाम कवचम्॥

श्रीभैरव उवाच-

श्रृणु देवि प्रवक्ष्यामि स्वरहस्यं च कामदम्।
श्रुत्वा गुप्ततमं गोप्यं कुरु गुप्तं सुरेश्वरि॥1॥

कवचं बगलामुख्याः सकलेष्टप्रदं कलौ।
यत्सर्वं च परं गुह्यं गुप्तं च शरजन्मनः॥2॥

त्रैलोक्यविजयं नाम कवचेशं मनोरमम्।
मन्त्रगर्भं मन्त्ररूप सर्वसिद्धिविनायकम्॥3॥

रहस्यं परमं ज्ञेय साक्षादमृतरूपिणम्।
ब्रह्मविद्यामयं वर्म दुर्लभं प्राणिनां कलौ॥4॥

पूर्णमेकोनपश्चाशद्वर्णैमन्त्रयैर्युतम्।
त्वद्भक्त्या वच्मि देवेशि गोपनीयं स्वयोनिवत्॥5॥

श्रीदेव्युवाच -

भगवन् करुणासागर विश्वनाथ सुरेश्वर।
कर्मणा मनसा वाच्यं न वच्म्यग्निभुवोऽपि च॥6॥

भैरव उवाच -

त्रैलोक्यविजयाख्यस्य कवचस्यास्य पार्वति।
मन्त्रगर्भस्य मु(सू?) क्तस्य ऋषिर्देवस्तु भैरवः॥7॥

उष्णिक छन्दः समाख्यातं देवी क्लीं (च?) बगलामुखी।
बीजं क्लीं ओं च शक्तिः स्यात् स्वाहा कीलकमुच्यते॥8॥

विनियोगः समाख्यातस्त्रिवर्गफलसाधने ।
देवी ध्यात्वा पठेद्वर्म मन्त्रगर्भ सुरेश्वरि ॥9॥

विना ध्यानेन नो सिद्धिः सत्यं जानीहि पार्वति ।
चन्द्रोद्भासितपूर्द्धजां रिपुरसां मुण्डाक्षमालाकरां,
बालां पीतस्रगुज्वलां मधुमदारक्तां जटाजूटिनीम्।
शत्रुस्तम्भनकारिणीं शशिमुखीं पीताम्बरोद्भासितां,
प्रेतस्थां बगलामुखीं भगवतीं कारुण्यरूपां भजे ॥10॥

ॐ क्लीं मम शिरसि पातु देवी ह्लीं बगलामुखी।
ॐ क्लीं पातु मे भाले देवी स्तम्भनकारिणी ॥11॥

ॐ अँ ईं हं भ्रुवौ पातु बगला क्लेशहारिणी।
ॐ हं क्षं पातु मे नेत्रे नारसिंही शुभङ्करी ॥12॥

ॐ ह्रीं श्रीं पातु मे जङ्घे अं आं इं भुवनेश्वरी।
ॐ क्लीं सः मे श्रुतीं पातु ईं उं ऊं ऋं मुखेश्वरी ॥13॥

ॐ ह्रीं क्रीं ह्रीं सदाव्यान्मे नासां ॠं लृं सरस्वती।
ॐ ह्रीं ह्रां मे मुखं पातु लॄं एं ऐं छिन्नमस्तका ॥14॥

ॐ श्रीं मे अधरौ पातु ओं औ दक्षिणकालिका ।
ॐ ह्रीं ह्रूं मे दन्तान् पातु अं अः मे भद्रकालिका ॥15॥

ॐ क्रीं श्रीं रसनां पातु कं खं गं घं चरात्मिका।
ॐ ऐं सौः मे हनौ पातु ङं चं छं जं च जानकी ॥16॥

ॐ श्रीं ग्रीं (क्लीं) मे गलं पातुं झं ञं टं ठं गणेश्वरी।
ॐ ह्रीं स्कन्धौ सदाव्यान्मे डं ढं णं चैव तोतला ॥17॥

ॐ ह्रीं मे भुजौ पातु तं थं दं वरवर्णिनी ।
ॐ क्लीं सौः मे स्तनौ पातु धं नं पं परमेश्वरी ॥18॥

ॐ जूं क्रों मे रक्ष वक्षः फं बं भं भगवासिनी।
ॐ क्राँ ह्रां पातु मे कुक्षि मं यं रं चक्रिवल्लभा ॥19॥

ॐ श्रीं ह्रूं पातु मे पार्श्वौ लं वं लम्बोदरप्रसूः।
ॐ क्रों ह्रूं पातु मे नाभि शं षं षणमुखपालिनी ॥20॥

ॐ क्रौं सौः पातु मे पृष्ठं सं हं हाटकरूपिणी।
ॐ क्लीं ऐं पातु मे शिश्नं पङ क्षं हं तत्वरूपिणी ॥21॥

ॐ क्लीं ह्रूं मे कटि पातु पञ्चाशद्वर्णमातृका।
ॐ ऐं क्लीं पातु मे गुह्यं अं आं कं गुह्यकेश्वरी ॥22॥

ॐ श्रीं ऊरू सदाव्यान्मे इं ईं खं रंगगामिनी।
ॐ जूं सः पातु मे जानू उं ऊं गं गणवल्लभा ॥23॥

ॐ श्रीं ह्रीं पातु मे जङ्घे ऋं ॠं घं च महारिणी।
ॐ श्रीं सः पातु मे गुल्फौ लृं लॄं ङं चं च कालिका ॥24॥

ॐ ऐं ह्रीं पातु मे सन्धी एं ऐं छं जं जगत् प्रिया।
ॐ श्रीं क्लीं पातु मे पादौ ओं औं झं ञ भगादरी ॥25॥

ॐ ह्रीं मे सर्ववपुः पातु अं अः ह्रीं त्रिपुरेश्वरी।
ॐ श्रीं पूर्वे सदाव्यान्मां अं आँ टं ठं शिखामुखी ॥26॥

ॐ ह्रीं याम्यां सदाव्यान्मां इ डं ढं णं च तारिणी।
ॐ ह्रीं मां पातु वारुण्यां ईं तं थं दं च खेश्वरी ॥27॥

ॐ यं मां पातु कौवेर्यां उं धं नं पं पिलंपिला।
ॐ श्री पातु चैशान्यां ऊं फं बं वैन्दवेश्वरी ॥28॥

ॐ श्रीं मां पातु चाग्नेय्यां ऋं भं मं यं च योगिनी।
ॐ ऐं मां पातु नैर्ऋत्यां ऋं रं राजेश्वरी सदा ॥29॥

ॐ श्रीं मां पातु वायव्यां लृं लं लम्बितकेशिनी ।
ॐ प्रभाते च मां पातु लॄ वं वागीश्वरी सदा ॥30॥

ॐ मध्याह्ने च मां पातु एं शं शङ्करवल्लभा ।
ॐ ह्रीं क्लीं श्रीं पातु मां सायं ऐं षं शाबरी सदा ॥31॥

ह्रीं निशादौ च मां पातु ओं सं सागरशायिनी ।
क्लीं निशीथे च मां पातु औं हं हरिहरेश्वरी ॥32॥

क्लीं ब्राह्मे मां मुहूर्त्तेऽव्यादं पङ्क्ष त्रिपुरसुन्दरी ।
विस्मारितं च यत्स्थानं वर्जितं कवचेन तु ॥33॥

ह्रीं तन्मे सकलं पातु अः क्षः क्लीं बगलामुखी ।
इतीदं कवचं गुह्यं मन्त्राक्षरमयं परम् ॥34॥

त्रैलोक्यविजयं नाम सर्ववर्णमयं स्मृतम् ।
अप्रकाश्यमदातव्यं न श्रोतव्यमवाचकम् ॥35॥

दुर्जनायाकुलीनाय दीक्षाहीनायं पार्वति ।
न दातव्यं न दातव्यमित्याज्ञा परमेश्वरि ॥36॥

अदीक्षित उपाध्यायविहीनः शक्तिभक्तिमान् ।
कवचस्यास्य पठनात् साधको दीक्षितो भवेत ॥37॥

कवचेशमिदं गोप्यं सिद्धविद्यामयं परम् ।
ब्रह्मविद्यामयमिदं यथाभीष्टफलप्रदम ॥38॥

न कस्य कथितं चैतत् त्रैलोक्यविजयेश्वरी ।
यस्य स्मरणमात्रेण देवी सद्यो वशीभवेत् ॥39॥

पठनाद्धारणाच्चास्य कवचेशस्य साधकः ।
कलौ विचरते वीरो यथा ह्रीं बगलामुखी ॥40॥

इमं मन्त्रं स्मरन्मन्त्री संग्रामं प्रविशद् यथा।
त्रिः पठेत् कवचेशन्तु युयुत्सुः साधकोत्तमः ॥41॥

शत्रून् कालसमानान् तु जित्वा स्वगृहमेष्यति।
मूर्ध्नि धृत्वा तु कवचं मन्त्रगर्भं तु साधकः ॥42॥

ब्रह्माद्यानमरान् सर्वान् सहसा वशमानयेत्।
धृत्वा गले तु कवचं साधकस्य महेश्वरि ॥43॥

वशमायान्ति सहसा रम्भाद्यप्सरसां गणाः।
उत्पातेषु च घोरेषु भयेषु विविधेषु च ॥44॥

रोगेषु कवचेशं च मन्त्रगर्भं पठेन्नरः।
कर्मणा मनसा वाचा तद्भयं शान्तिमेष्यति ॥45॥

श्रीदेव्या बगलामुख्याः कवचेशं मया स्मृतम्।
त्रैलोक्यविजयं नाम पुत्रपौत्रधनप्रदम् ॥46॥

ऋणहर्त्तारमेतत्स्याल्लक्ष्मीभोगविवर्द्धनम्।
वन्ध्या धारयते कुक्षौ पुत्रं पश्यति नान्यथा ॥47॥

मृतवत्सा च विभृत्याथ कवचं बगले सदा।
दीर्घायुर्व्याधिहीनस्तु तत्पुत्रस्तु भविष्यति ॥48॥

इतीदं बगलामुख्याः कवचेशं सुदुर्लभम्।
त्रैलाक्यविजयं नाम न देयं यस्य कस्यचित ॥49॥

अकुलीनाय मूढाय भक्तिहीनाय देहिने।
लोभयुक्ताय देवेशि न दातव्यं कदाचन ॥50॥

शिष्याय भक्तियुक्ताय गुरुभक्तिपराय च।
लोभदन्तविहीनाय कवचेशं प्रदीयताम ॥51॥

अभक्तेभ्यो विपुत्रेभ्यो दत्वा कुष्ठी भवेन्नरः।
फलं गृहं न चाप्नोति परं च नरकं व्रजेत्॥52॥

दीपमुज्ज्वाल्य मूलेन पठेद्धर्मेदमुत्तमम्।
प्राप्ते कन्यार्कवारे च राजा तद्गृहमेष्यति॥53॥

मण्डलेशो महेशानि सत्यं सत्यं न संशयः।
इदं तु कवचेशं तु मया दिव्यं नगात्मने॥54॥

पूजनात् पठनाच्चास्य चतुर्वर्गफलप्रदम्।
गोप्यं गुप्ततरं देवि गोपनीयं स्वयोनिवत ॥55॥

इति श्रीबगलामुखीत्रैलोक्यविजयं नाम कवचम्

विशेष :- इस कवच का पाठ न्यायालय, शासन, प्रशासनिक, पुलिस बन्धन, कारागार से मुक्ति आदि के लिए करवाना चाहिए।

नानाविध साँख्यायन बगलामन्त्र :

1. एकाक्षरीबगलामन्त्र-ह्लीं ।

ॐ अस्य श्रीबगलामुख्येकाक्षरीमहामन्त्रस्य ब्रह्मा ऋषिर्गायत्रीछन्दः श्रीबगलामुखी देवता लँ बीजं, ह्लीं शक्ति, ईं कीलकं श्रीबगलामुखीदेवताम्बा प्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - ब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदि, लँ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, रँ कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्लाँ अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं तर्जनीभ्यां स्वाहा, ॐ ह्लूँ मध्यमाभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुम्, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लः करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लाँ हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुम्, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट्।

ध्यानम् -

वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति,
क्रोधी शान्तति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति।
गर्वी खर्वति सर्वविच्च जडति त्वद्यन्त्रिणा यन्त्रितः,
श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः॥

2. श्रीबगलाषट्त्रिशदक्षरीविद्यामन्त्रः

ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धि विनाशय ह्लीं ॐ स्वाहा। ॐ अस्य श्रीबगलामुखीषट्त्रिंशदक्षरीविद्यामहामन्त्रस्य श्रीनारदऋषिः, बृहतीछन्दः, श्रीबगलामुखीदेवता, लँ बीजं, हँ शक्तिः, ईं कीलकं, श्रीबगलामुखीदेवताप्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्रीनारदर्षये नमः शिरसि, बृहतीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदये, लँ बीजाय नमो गुह्ये, हँ शक्तये नमः पादयोः, ईं कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट् ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्ली ॐ स्वाहा करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लीं हृदयाय नमः, ॐ ह्लीं बगलामुखिं शिरसे स्वाहा, ॐ ह्लों सर्वदुष्टानां शिखायै वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय कवचाय हुँ, ॐ ह्लीं जिह्वां कीलय नेत्रत्रयाय वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट्।

ध्यानम् -

चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम्।
त्रिशूल पानपात्रं च गदां जिह्वां च बिभ्रतीम्।।

बिम्बोष्ठीं कम्बुकण्ठीं च समपीनपयोधराम्।
पीताम्बरां मदाघूर्णां ध्यायेद् ब्रह्मास्त्रदेवताम्।।

3. श्रीबगलामुखीगायत्रीमन्त्र

ॐ ह्लीं ब्रह्मास्त्राय विद्महे स्तम्भनबाणाय धीमहि तन्नो बगला प्रचोदयात्।

ॐ अस्य श्रीबगलागायत्रीमन्त्रस्य ब्रह्मा ऋषिः, गायत्रीछन्दः, ब्रह्मास्त्र बगलादेवता, ॐ बीज, ह्लीं शक्तिः, विद्महे कीलकं, श्रीबगलामुखीदेवताप्रसाद सिद्धये जपे विनियोगः।

ऋष्यादिन्यासः - श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीब्रह्मास्त्रबगलामुखीदेवतायै नमो हृदये, ॐ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, विद्महे कीलकाय नमः सर्वाङ्गे ।

करन्यासः - ॐ ह्लीं ब्रह्मास्त्राय विद्महे अङ्गुष्ठाभ्यां नमः, स्तम्भन

बाणायधीमहि तर्जनीभ्यां स्वाहा, तन्नो बगला प्रचोदयात् मध्यमाभ्यां वषट्, ॐ ह्लीं ब्रह्मास्त्राय विद्महे अनामिकाभ्यां हुम्, स्तम्भनबाणाय धीमहि कनिष्ठिकाभ्यां वौषट्, तन्नो बगला प्रचोदयात् करतलकर- पृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लीं ब्रह्मास्त्राय विद्महे हृदयाय नमः, स्तम्भन बाणाय धीमहि शिरसे स्वाहा, तन्नो बगला प्रचोदयात् शिखायै वषट्, ॐ ह्लीं ब्रह्मास्त्राय विद्महे कवचाय हुम, स्तम्भनबाणाय धीमहि नेत्रत्रयाय वौषट्, तन्नो बगला प्रचोदयात् अस्त्राय फट्।

4. पञ्चपञ्चाशदक्षरो बगलामुखीपञ्चास्त्रमन्त्रः

ॐ ह्लीं हूं ग्लौं बगलामुखि ह्लाँ ह्लीं ह्लूँ सर्वदुष्टानां ह्लैं ह्लौं ह्लः वाचं मुखं पदं स्तम्भय स्तम्भय ह्लः ह्लौं ह्लैं जिह्वां कीलय ह्लूँ ह्लीं ह्लाँ बुद्धिं विनाशय ग्लौं हूँ ह्लीं ॐ स्वाहा।

ॐ अस्य श्रीबगलामुखीपञ्चास्त्रमहामन्त्रस्य वशिष्ठऋषिः, पङ्क्तिश्छन्दः, रणस्तम्भनकारिणी बगलामुखी देवता, लँ बीजं, ह्लीं शक्तिः, रं कीलकं श्रीबगलामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्रीनारदऋषये नमः शिरसि, श्रीबगलामुखी देवतायै नमो हृदये, लँ बीजाय नमो गुह्ये, हँ शक्तये नमः पादयोः ईं कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखी तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुम्, ॐ ह्लीं जिह्वां कीलय कनिष्ठकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकर- पृष्ठाभ्यां फट्। एवं हृदयादिन्यासः।

ध्यानम् -

पीताम्बरधरां देवीं द्विसहस्त्रभुजान्विताम्।
सान्द्रजिह्वां गदां चास्त्रं धारयन्तीं शिवां भजेत्॥

5. अष्टपञ्चाशदक्षर उल्कामुख्यस्त्रमन्त्रः

ॐ ह्लीं ग्लौं बगलामुखी ॐ ह्लीं ग्लौं सर्वदुष्टानां ॐ ह्लीं ग्लौं वाचं मुखं पदं ॐ ह्लीं ग्लौं स्तम्भय स्तम्भय ॐ ह्लीं ग्लौं जिह्वां कीलय ॐ ह्लीं ग्लौं बुद्धिं विनाशय ॐ ह्लीं ग्लौं ह्लीं ॐ स्वाहा।

" ॐ ह्लीं हूँ ग्लौं बगलामुखी ह्लाँ ह्लीं हूँ सर्वदुष्टानां ह्लाँ ह्लीं ह्लः वाचं मुखं पदं स्तम्भय ह्लः हें हैं जिह्वां कीलय ह्लाँ ह्लौं ह्लों बुद्धि विनाशय ह्लाँ ह्लीं हूँ ग्लौं हूँ ह्लीं ॐ स्वाहा" इत्येदंविधो मन्त्रोऽत्यन्यत्र दृश्यते।

" ॐ ह्लीं ग्लौं वगलामुखि सर्वदुष्टानां ॐ ह्लीं ग्लौं वाचं मुखं पदं ॐ ह्लीं ग्लौं स्तम्भय स्तम्भय ॐ ह्लीं ग्लौं जिह्वां कीलयं कीलय ॐ ह्लीं ग्लौं वुद्धिं नाशय नाशय ॐ ह्लीं ग्लौं स्वाहा" इत्यपि मन्त्रभेदो दृश्यतेऽन्यत्र।

ॐ अस्य श्रीउल्कामुख्यस्त्रमन्त्रस्य श्रीअग्निवराह ऋषिः, ककुप् छन्दः, श्रीउल्कामुखी देवता, ह्लीं बीजं, स्वाहा शक्तिः, ग्लौं कीलकं, जगत्स्तम्भनकारिणी श्रीउल्कामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्रीवराहर्षये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, श्रीउल्कामुखीदेवतायै नमो हृदि, ह्लीं बीजाय नमो गुह्ये, स्वाहाशक्तये नमः पादयोः, ग्लौं कीलकाय नमः सर्वाङ्गें।

करन्यासः - ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट् ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुं, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्ली ॐ स्वाहा करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लीं हृदयाय नमः, ॐ ह्लीं बगलामुखि शिरसे स्वाहा, ॐ ह्लों सर्वदुष्टानां शिखायै वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय कवचाय हुं, ॐ ह्लीं जिह्वां कीलय नेत्रत्रयाय वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट्।

ध्यानम् -

विलयानलसंकाशां वीरां वेदसमन्विताम्।
विराणमयीं महादेवीं स्तम्भनार्थं भजाम्यहम्॥

6. षष्टिवर्णात्मकः श्रीजातवेदमुख्यस्त्रमन्त्रः

ॐ ह्लीं ह्सौं ह्लीं ॐ बगलामुखि सर्वदुष्टानां ॐ ह्लीं ह्सौं ह्लीं ॐ वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं ह्सौं ह्लीं ॐ जिह्वां कीलय ॐ ह्लीं ह्सौं ह्लीं ॐ बुद्धिं नाशय नाशय ॐ ह्लीं ह्सौं ॐ स्वाहा।

ॐ अस्य श्रीजातवेदमुख्यस्त्रमन्त्रस्य श्रीकालाग्निरुद्र ऋषिः, पंक्तिश्छन्दः, श्रीजातवेदमुखी देवता, ॐ बीजं, ह्लीं शक्तिः, हँ कीलकम्, मम श्रीजातवेदमुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः - श्रीकालाग्निरुद्रर्षये नमः शिरसि, पंक्तिच्छन्दसे नमो मुखे, श्रीजातवेदमुखीदेवतायै नमो हृदये, ॐ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, हँ कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट् ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्ली ॐ स्वाहा करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लीं हृदयाय नमः, ॐ ह्लीं बगलामुखि शिरसे स्वाहा, ॐ ह्लों सर्वदुष्टानां शिखायै वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय कवचाय हुँ, ॐ ह्लीं जिह्वां कीलय नेत्रत्रयाय वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट्।

ध्यानम् -

जातवेदमुखीं देवीं देवतां प्राणरूपिणीम्।
भजेऽहं स्तम्भनार्थं च स्तंभिनीं विश्वरूपिणीम्॥

मन्त्रोऽयं सूत्रानुसारेण तु द्वाषष्टिवर्णात्मको जायते किन्त्वन्यत्र निम्नोद्धृतरीत्या दृश्यते षष्टिवर्णाः - " ॐ ह्लीं हौं ह्लीं बगलामुखि सर्वदुष्टानां ॐ ह्लीं हौं ह्ली ॐ वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं हौं ह्ली ॐ जिह्वां कीलय ॐ ह्लीं हौं ॐ बुद्धिं नाशय नाशय ॐ ह्लीं हौं ह्ली ॐ स्वाहा" ।

---

7. विंशोत्तरशतवर्णात्मको ज्वालामुख्यास्त्रमन्त्रः

ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर बगलामुखि ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर सर्वदुष्टानां ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर जिह्वां कीलय कीलय ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर बुद्धिं विनाशय विनाशय ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर स्वाहा।

ॐ अस्य श्रीज्वालामुख्यस्त्रमन्त्रस्य श्रीअत्रि ऋषिर्गायत्री छन्दः, श्रीज्वालामुखी देवता, ॐ बीजं ह्लीं शक्तिः, हँ कीलक श्रीज्वाला- मुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्री अत्रिऋषये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीज्वालामुखीदेवतायै नमो हृदि, ॐ बीजय नमो गुह्ये, ह्लों शक्तये नमः पादयोः, हँ कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट् ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्ली ॐ स्वाहा करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लीं हृदयाय नमः, ॐ ह्लीं बगलामुखि शिरसे स्वाहा, ॐ ह्लों सर्वदुष्टानां शिखायै वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय कवचाय हुं, ॐ ह्लीं जिह्वां कीलय नेत्रत्रयाय वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट्।

ध्यानम् -

ज्वलत्पद्मासनायुक्तां कालानलसमप्रभाम्।
चिन्मयीं स्तम्भिनीं देवीं भजेऽहं विधिपूर्वकम्॥

8.षडुत्तरशताधिकवर्णात्मकः श्रीबृहद्भानुमुख्यस्त्रमन्त्रः

ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ बगलामुखी ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ सर्वदुष्टानां वाचं मुखं पदं स्तम्भय

स्तम्भय ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ जिह्वां कीलय ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ बुद्धि नाशय ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ ह्लीं ॐ स्वाहा।

अन्यत्रैष मन्त्रश्चतुरुत्तरशतवर्णात्मकोऽपि दृश्यते यथा - ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ बगलामुखी ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ जिह्वां कीलय ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ बुद्धि नाशय ॐ ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ ह्लीं ॐ स्वाहा॥

ॐ अस्य श्रीबृहद्भानुमुख्यस्त्रमन्त्रस्य श्रीसविता ऋषिः, गायत्री छन्दः, श्रीबृहद्भानुमुखी देवता, ह्लीं बीजं , ह्लीं शक्तिः, ॐ कीलकं, श्रीबृहद्भानुमुखीदेवताम्बा प्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्री सवित्पृषये नमः शिरसि, गायत्रीछन्दसे नमो मुखे श्रीबृहद्भानुमुखीदेवतायै नमो हृदये, ह्लीं बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, ॐ कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट् ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्ली ॐ स्वाहा करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लीं हृदयाय नमः, ॐ ह्लीं बगलामुखि शिरसे स्वाहा, ॐ ह्लों सर्वदुष्टानां शिखायै वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय कवचाय हुं, ॐ ह्लीं जिह्वां कीलय नेत्रत्रयाय वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट्।

ध्यानम् -

कालानलनिभां देवीं ज्वलत्पुञ्जशिरारुहाम्।
कोटिबाहुसमायुक्तां वैरिजिह्वासमन्विताम्॥1॥

स्तम्भनास्त्रमयीं देवीं दृढपीनपयोधराम्।
मदिरामदसंयुक्तां बृहद्भानुमुखीं भजे ॥2॥

9. श्रीबगलामुखीशताक्षरीमहामन्त्रः

ह्लीं ऐं ह्लीं क्लीं श्रीं ग्लौं ह्लीं बगलामुखि स्फुर स्फुर सर्व दुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय प्रस्फुर प्रस्फुर विकटाङ्गि घोररूपि जिह्वां कीलय महाभ्रमकरि बुद्धिं नाशय विराण्मयि सर्वप्रज्ञामयि प्रज्ञां नाशय उन्मादीकुरु कुरु मनोपहारिणि ह्लीं ग्लौं श्रीं क्लीं ह्लीं ऐं ह्लीं स्वाहा॥

ॐ अस्य श्रीबगलामुखीशताक्षरीमहामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, जगत्स्तम्भनकारिणी श्रीबगलामुखी देवता, ह्लीं बीजं, ह्लीं शक्तिः, ऐं कीलकं, जगत्स्तम्भनकारिणी श्रीबगलामुखी- देवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः।

करन्यासः - ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट् ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुं, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्ली ॐ स्वाहा करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लीं हृदयाय नमः, ॐ ह्लीं बगलामुखि शिरसे स्वाहा, ॐ ह्लीं सर्वदुष्टानां शिखायै वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय कवचाय हुं, ॐ ह्लीं जिह्वां कीलय नेत्रत्रयाय वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट्।

ध्यानम् -

पीताम्बरधरां सौम्यां पीतभूषणभूषिताम्।
स्वर्णसिंहासनस्थां च मूले कल्पतरोरधः॥1॥

वैरिजिह्वाभेदनार्थं छुरिकां बिभ्रतीं शिवाम्।
पानपात्रं गदां पाशं धारयन्तीं भजाम्यहम्॥2॥

10. अष्टाविंशत्युत्तरैकशताक्षरः श्रीबगलामुखीपरविद्याभेदनमन्त्रः

ॐ ह्लीं श्रीं ह्लीं 'ग्लौं ऐं क्लीं हुं क्ष्रीं' बगलामुखि परप्रयोगं ग्रस ग्रस ॐ ह्लीं श्रीं ह्लीं ग्लौं ऐं क्लीं हुं क्ष्रीं ब्रह्मास्त्ररूपिणि परविद्याग्रसिनि भक्षय भक्षय ॐ ह्लीं श्रीं ह्लीं ग्लौं ऐं क्लीं हुं क्ष्रीं परप्रज्ञाहारिणि प्रज्ञां भ्रंशय भ्रंशय ॐ ह्लीं श्रीं ह्लीं ग्लौं ऐं क्लीं हुं क्ष्रीं स्तम्भनास्त्ररूपिणि बुद्धिं नाशय नाशय पञ्चेन्द्रियज्ञानं भक्ष भक्ष ॐ ह्लीं श्रीं ह्लीं ग्लौं ऐं क्लीं हुं क्ष्रीं बगलामुखि हुं फट् स्वाहा।

ॐ अस्य श्रीपरविद्याभेदिनीबगलामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, परविद्याभक्षिणी श्रीबगलामुखी देवता, आँ बीजं, ह्रीं शक्तिः क्रों कीलकं, श्रीबगलादेवीप्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, परविद्याभक्षिणीश्रीबगलामुखीदेवतायै नमो हृदये, आं बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, क्रों कीलकाय नमः सर्वाङ्गे।

करन्यासः - आँ ह्रीं क्रों अङ्गुष्ठाभ्यां नमः, वद वद तर्जनीभ्यां स्वाहा, वाग्वादिनि मध्यमाभ्यां वषट्, स्वाहा अनामिकाभ्यां हुँ, ऐं क्लीं सौं कनिष्ठिकाभ्यां वौषट्, ह्रीँ करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - आँ ह्रीं क्रों हृदयाय नमः, वद वद शिरसे स्वाहा, वाग्वादिनि शिखायै वषट्, स्वाहा कवचाय हुँ, ऐं क्लीं सौं नेत्रत्रयाय वौषट्, ह्रीं अस्त्राय फट्।

ध्यानम् -

सर्वमन्त्रमयीं देवीं सर्वाकर्षणकारिणीम्।
सर्वविद्याभक्षिणीं च भजेऽहं विधिपूर्वकम्॥

11. त्रिचत्वारिंशदक्षरी बगलास्त्रमन्त्रः

ॐ ह्रीं हुँ ग्लौं ह्रीं बगलामुखि मम शत्रुन् ग्रस् ग्रस खाहि खाहि भक्ष भक्ष शोणितं पिब पिब बगलामुखि ह्रीं ग्लौं हुँ 'फट स्वाहा'।

ॐ अस्य श्रीबगलास्त्रमन्त्रस्य श्रीदुर्वासा ऋषिः, अनुष्टुप् छन्दः, अस्त्रः रूपिणीश्रीबगलामुखी देवता, ग्लौं बीजं, ह्रीं शक्तिः, फट् कीलकं श्रीअस्त्ररूपिणीबगलाम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्रीदुर्वाससे ऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, अस्त्ररूपिण्यै श्रीबगलादेवतायै नमो हृदये, ग्लौं बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, फट् कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्रीं अङ्गुष्ठाभ्यां नमः, बगलामुखि तर्जनीभ्यां स्वाहा, सर्वदुष्टानां मध्यमाभ्यां वषट्, वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, जिह्वां

कीलय कनिष्ठिकाभ्यां वौषट्, बुद्धिं विनाशय ह्रीं ॐ स्वाहा करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्रीं हृदयाय नमः, बगलामुखि शिरसे स्वाहा, सर्वदुष्टानां शिखायै वषट्, वाचं मुखें पदं स्तम्भय कवचाय हुँ, जिह्वां कीलय नेत्रत्रयाय वौषट्, बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट्।

ध्यानम् -

चतुर्भुजां त्रिनयनां पीनोन्नतपयोधराम् ।
जिह्वां खड्गं पानपात्र 'गदां धारयन्तीं पराम्' ॥1॥

पीताम्बरधरां देवीं पीतपुष्पैरलङ्कृताम् ।
बिम्बोष्ठीं चारुवदनां मदघूर्णितलोचनाम् ॥2॥

सर्वविद्याकर्षिणीं च सर्वप्रज्ञापहारिणीम् ।
भजेऽहं चास्त्रबगलां सर्वाकर्षणकर्मसु ॥3॥

12. श्रीबगलाचतुरक्षरीमन्त्रः

ॐ आँ ह्रीं क्रों । ॐ अस्यं श्रीबगलाचतुरक्षरीमन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, श्रीबगला देवता, ह्रीं बीजं, आँ शक्तिः, क्रों कीलकं श्रीबगलामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलादेवतायै नमो हृदये, ह्रीं बीजाय नमो गुह्ये, आं शक्तये नमः पादयोः, क्रों कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्लां अङ्गुष्ठाभ्यां नमः, ॐ ह्रीं तर्जनीभ्यां स्वाहा, ॐ ह्लूँ मध्यमाभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुँ, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लः अस्त्राय फट्।

('गदामस्त्रं च बिभ्रतीं' तथा च 'गदां धारयन्तीं शिवाम्' इति पाठभेदौ।)

हृदयादिन्यासः - ॐ ह्लां हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुँ, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट्।

ध्यानम् -

कुटिलालकसंयुक्तां मदाघूर्णितलोचनाम्।
मदिरामोदवदनां प्रवालसदृशाधराम्॥1॥

सुवर्णाशैलसुप्रख्यंकठिनस्तनमण्डलाम्।
दक्षिणावर्त्तसन्नाभिसूक्ष्ममध्यमसंयुताम् ॥2॥

रम्भोरुपादपद्मां तां पीतवस्त्रसमावृताम् ।

13. अशीत्यक्षरात्मकः श्रीबगलाहृदयमन्त्रः

ॐ आं ह्लीं क्रों ग्लौं हुं ऐं क्लीं श्रीं ह्लीं बगलाामुखि आवेशय आवेशय आं ह्लीं क्रों ब्रह्मास्त्ररूपिणि एहि एहि आं ह्लीं क्रों मम हृदये आवाहय आवाहय सन्निधिं कुरु कुरु आं ह्लीं क्रों मम हृदये चिरं तिष्ठ तिष्ठ आं ह्लीं क्रों हुँ फट् स्वाहा।

करन्यासः - ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट् ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्ली ॐ स्वाहा करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लीं हृदयाय नमः, ॐ ह्लीं बगलामुखि शिरसे स्वाहा, ॐ ह्लों सर्वदुष्टानां शिखायै वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय कवचाय हुँ, ॐ ह्लीं जिह्वां कीलय नेत्रत्रयाय वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट्।

मन्त्रः - ॐ आं ह्लीं क्रों हुं फट् स्वाहा। ॐ अस्य श्रीबगलाष्टाक्षरात्मकमन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, श्रीबगलामुखी देवता, ॐ बीजं, ह्लीं॑ शक्तिः, क्रो॑ कीलकं श्रीबगलादेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदि, ॐ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, क्रो॑ कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्लां अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं तर्जनीभ्यां स्वाहा,

ॐ ह्लूँ मध्यमाभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुँ, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लः करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ ह्लां हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुँ, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट्।

ध्यानम् -

युवतीं च मदोद्रिक्तां पीताम्बरधरां शिवाम्।
पीतभूषणभूषाङ्गीं समपीनपयोधराम् ॥1॥

मदिरामोदवदनां प्रवालसदृशाधराम् ।
'पानपात्रं च शुद्धिं च' बिभ्रतीं बगलां स्मरेत्॥2॥

14. एकानषष्टिवर्णात्मकः श्रीबगलोपसंहारविद्यामन्त्रः

ग्लौं हुँ ऐं ह्रीं श्रीं कालि कालि महाकालि एहि एहि कालरात्री आवेशय आवेशय महामोहे महामोहे स्फुर स्फुर प्रस्फुर प्रस्फुर स्तंभनास्त्रशमनि हुँ फट् स्वाहा।

ॐ अस्य श्रीबगलास्त्रोपसंहारविद्यामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, स्तंभनास्त्रविभेदिनी श्रीकालिका देवता, क्रीं बीजं, फट् शक्तिः, स्वाहा कीलकं श्रीबगलाप्रसादसिद्धिद्वारा ब्रह्मास्त्रोपसंहारार्थे जपे विनियोगः।

ऋष्यादिन्यासः - श्रीब्रह्मर्षये नमःशिरसि, गायत्रीछन्दसे नमो मुखे, स्तम्भनास्त्रविभेदिनीश्रीकालिकादेवतायै नमो हृदये, क्रीं बीजाय नमो गुह्ये, फट्शक्तये नमः पादयोः, स्वाहा कीलकाय नमः सर्वाङ्गे।

करन्यासः - ॐ क्राँ अङ्गुष्ठाभ्यां नमः, ॐ क्रीं तर्जनीभ्यां स्वाहा, ॐ क्रूँ मध्यमाभ्यां वषट्, ॐ क्रैं अनामिकाभ्यां हूँ, ॐ क्रौं कनिष्ठिकाभ्यां वौषट्, ॐ क्रः करतलकरपृष्ठाभ्यां फट्।

हृदयादिन्यासः - ॐ क्राँ हृदयाय नमः, ॐ क्रीं शिरसे स्वाहा, ॐ क्रूं शिखायै वषट्, ॐ क्रैं कवचाय हूँ, ॐ क्रौं नेत्रत्रयाय वौषट्, ॐ क्रः अस्त्राय फट्।

ध्यानम् -

कालीं करालवदनां कलाधरधरां शिवाम्।
स्तम्भनास्त्रैकसंहारीं ज्ञानमुद्रसमन्विताम्॥1॥

वीणापुस्तकसंयुक्तां कालरात्रिं नमाम्यहम्।
बगलास्त्रोपसंहारीदेवतां विश्वतोमुखीम्॥2॥

भजेऽहं कालिकां देवीं जगद्वशकरां शिवाम्।

15. द्वात्रिंशद्वर्णात्मकस्ताक्ष्र्यमालामन्त्रः

ॐ क्ष्रीं नमो भगवते क्ष्रीं पक्षिराजाय सर्वाभिचारध्वंसकाय क्षीमों फट् स्वाहा।

बगलोत्कीलनविधिः

प्रणवं पूर्वमुच्चार्य कूर्चयुग्मं समुच्चरेत्।
कामत्रयं वाग्भवं च लज्जाषट्कं समुच्चरेत्॥1॥

क्रींकाराष्टकमुच्चार्य बगलाशापमुच्चरेत्।
उत्कीलनपदद्वन्द्वं अग्निजायां समुद्धरेत्॥2॥

शापोद्धारप्रकारोऽयं तन्त्रराजे प्रकीर्त्तितः।
उत्कीलिता ब्रह्मविद्या मन्त्रेनानेन सिद्ध्यति॥3॥

स्पष्टार्थः - ॐ हूँ हूँ क्लीं क्लीं ऐं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं बगलाशापमुत्कीलय उत्कीलय स्वाहा॥

विशेष :- इस श्लोक का पाठ एवं मन्त्र का उच्चारण किसी भी स्थान आदि के कीलन अथवा बाह्यवायु को स्थाई रूप से हटाने के लिए करना चाहिए।

॥ श्री भगवती बगलामुखी जी॥

आरती

जय पीताम्बरधारिणि जय सुखदे वरदे, मातर्जय वरदे।
भक्त जनानां क्लेशं, भक्त जनानां क्लेशं, सततं दूर करे।
जय देवि बगले।

असुरैपीडित देवास्तव शरणं प्राप्ताः, मातस्तव शरणं प्राप्ताः।
धृत्वा कौर्मशरीरं, धृत्वा कौर्मशरीरं, दूरीकृत दुखम्।
जय देवि बगले।

मुनिजन वन्दित चरणे जय विमले बगले, मातर्जय विमले बगले।
संसारर्णवभीर्ति, संसारर्णवभीर्ति नित्यं शान्त करे।
जय देवि बगले।

नारदसनक मुनीन्द्वैर्ध्यातं पदकमलं, मातर्ध्यातं पदकमलम्।
हरिहरद्रुहिणं सुरेन्द्वैः हरिहरद्रुहिणं सुरेन्द्वैः, सेवितपदयुगलम्।
जय देवि बगले।

काञ्चनपीठनिविष्टे मुद्गरपाशयुते, मातर्मुद्गरपाशयुते।,
जिव्हा वज्र सुशोभित जिव्हा वज्र सुशोभित, पीतांशुकलसिते।
जय देवि बगले।

विन्दुत्रिकोणषडस्त्रै रष्टदलोपरि ते, मारष्टदलोपरि ते।
षोडशदलगतपीठं, षोडषदलगतपीठं भूपूरवृत्तयुतम्।
जय देवि बगले।

इत्थंसाधक वृन्दश्चिन्तयते रूपं, मातश्चिन्तयते रूपम्।
शत्रुविनाशकवीजं, शत्रुविनाशकवीजं, धृत्वा हृत्कमले।
जय देवि बगले।

अणिमादिक बहुसिद्धिं लभते सौख्ययुतां, मातर्लभते सौख्ययुतां।
भोगान् भुक्त्वा सर्वान् गच्छति विष्णुपदम्।
जय देवि बगले।

पूजाकाले कोऽपि आर्तिक्यं पठते, मातरार्तिक्यं पठते।
धनधान्यादि समृद्धो धनधान्यादि समृद्धः सान्निध्यं लभते।
जय देवि बगले।

श्री बगलामुखी तन्त्र में उपयोग हेतु कुण्डों के चित्र



आजपंगगंग्रग्रह ६८ म २०
प. १८६ श्लो० ८४





हयाटर्नेकरंपन्त्रम् ७४ त. २०
प. १८७ श्लो० १०१









वन्दना

डॉ. लक्ष्मीनारायण शास्त्री
व्याख्याता न्यायदर्शन
रा. म. आ. संस्कृत महाविद्यालय
गांधीनगर, जयपुर

**या देवी
सर्वभूतेषुमातृ
रूपेणसंस्थिता
नमस्तस्यै
नमस्तस्यै
नमस्तस्यै
नमोनमः।।**

प्राचीन चित्र पक्षीराज

लेखक परिचय

डॉ. लक्ष्मीनारायण शास्त्री का जन्म राजस्थान प्रान्त में जिला धौलपुर के ग्राम–बगचौलीखार में माता श्रीमती गंगा देवी पिता स्व. पं. श्री केशवदेव शास्त्री (व्याकरणाचार्य) के घर 10 सितम्बर 1968 को हुआ। प्रपितामह प. स्व. श्री भीमसेन शास्त्री म.प्र., उ.प्र. व धौलपुर जिले के प्रख्यात तॉन्त्रिक व ज्योतिषी थे।

शास्त्री जी ने अपने परदादा से तन्त्र एवं ज्योतिष तथा पिता स्व. श्री केशवदेव शास्त्री से व्याकरण शास्त्र का पारम्परिक ज्ञान प्राप्त किया। दर्शनशास्त्र, न्यायशास्त्र, धर्मशास्त्र, वास्तुशास्त्र, ज्योतिष एवं तन्त्रशास्त्र में इनके अनेक व्याख्यानों का प्रकाशन हुआ है।

गुरु परम्परा : त्रिदण्डी स्वामी 1008 श्री देवनारायण जी महाराज , प्रो. सी. एल. मिश्रा, डॉ. एस. एन. ताताचार्य (तिरूपति), प्रो. एस. पी. शुक्ला, डॉ. कमलनयन शर्मा (उपाचार्य केन्द्रीय संस्कृत विद्यापीठ), डॉ. मण्डन शर्मा, प्रो. आनन्द पुरोहित (प्रार्चाय–राज. महा. आ. संस्कृत महाविद्यालय, जयपुर)।

शिक्षा : पी. एच. डी., दर्शन, न्याय , धर्म शास्त्र वेदाचार्य, शिक्षा शास्त्री

अनुभव : ज्योतिष, वास्तुशास्त्र, तन्त्रशास्त्र एवं पौरोहित्य

कार्यक्षेत्र : 1. न्यायशास्त्र व्याख्याता (राज. महा. आ. संस्कृत महाविद्यालय, जयपुर)
2. अध्यक्ष : राजस्थान वैदिक तांत्रिक शोध संस्थान जयुपर।

प्रकाशित ग्रन्थ : 1. वास्तुतत्त्वदीपिका 2. करगिलयुद्धेहुतराजस्थानम् 3. प्रज्ञासत्यवती 4. श्रीबगलासुखीतत्त्व विमर्श।

सहयोग आभार : श्री रामगोपाल शर्मा, श्री राधेश्याम शर्मा (ज्येष्ठ भ्रातरौ) श्रीमती इन्द्राशर्मा (लेखक पत्नी), रवि, सचिन (पुत्रौ), रश्मि (पुत्री), डॉ. कमल चोटिया, डॉ. अशोक झा, श्री सन्तोष कुमार गुप्ता।

पुस्तक प्राप्ति स्थल :

राजस्थान वैदिक तांत्रिक शोध संस्थान

4एफ एफ, जे.डी.ए. फ्लेट्स, चित्रकूट, अजमेर रोड़, जयपुर (राजस्थान)

मोबाईल : 91–9414228995